# .. Tripuratilakam ..

# ॥ त्रिपुरातिलकम् ॥

## Document Information

Text title : tripurAtilakam

File name : tripurAtilakam.itx

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 6, 2016

sanskritdocuments.org

# ॥ त्रिपुरातिलकम् ॥

कल्पशाखिगणसत्प्रसूनमधुपानकेलिकुतुकभ्रमत्
षट्पदारवमनोहरे कनकभूधरे ललितमण्डपे ।
अत्युदारमणिपीठमध्यविनिवासिनीमखिलमोहिनीं
भक्तियोगसुलभां भजे भुवनमातरं त्रिपुरसुन्दरीम् ॥ १॥

एककालसमुदीयमानतरुणार्ककोटिसदृशस्फुर-
द्देहकान्तिभरधोरणीमिलनलोहितीकृतदिगन्तराम् ।
वागधीतविभवां विपद्यभयदायिनीमखिलमोहिनीं
आगमार्थमणिदीपिकामनिशमाश्रये त्रिपुरसुन्दरिम् ॥ २॥

ईषदुन्मिषदमर्त्यशाखिकुसुमावलीविमलतारका-
वृन्दसुन्दरसुधांशुखण्डसुभगीकृतातिगुरुकैशिकाम् ।
नीलकुञ्चितघनालकां निटिलभुषणायतविलोचनां
नीलकण्ठसुकृतोन्नतिं सततमाश्रये त्रिपुरसुन्दरीम् ॥ ३॥

लक्ष्महीनविधुलक्षनिर्जितविचक्षणाननसरोरुहां
इक्षुकार्मुकशरासनोपमितचिल्लिकायुगमतल्लिकाम् ।
लक्षये मनसि सन्ततं सकलदुष्कृतक्षयविधायिनीं
उक्षवाहनतपोविभूतिमहदक्षरां त्रिपुरसुन्दरीम् ॥ ४॥

ह्रीमदप्रमदकामकौतुककृपादिभावपिशुनायत-
स्निग्धमुग्धविशदत्रिवर्णविमलालसालसविलोचनाम् ।
सुन्दराधरमणिप्रभामिलितमन्दहासनवचन्द्रिकां
चन्द्रशेखरकुटुम्बिनीमनिशमाश्रये त्रिपुरसुन्दरीम् ॥ ५॥

हस्तमृष्टमणिदर्पणोज्ज्वलमनोज्ञदण्डफलकद्वये
बिम्बितानुपमकुण्डलस्तबकमण्डिताननसरोरुहाम् ।
स्वर्णपङ्कजदलान्तरुल्लसितकर्णिकासदृशनासिकां
कर्णवैरिसखसोदरीमनिशमाश्रये त्रिपुरसुन्दरीम् ॥ ६॥

सन्मरन्दरसमाधुरीतुलनकर्मठाक्षरसमुल्लस-
न्नर्मपेशलवचोविलासपरिभूतनिर्मलसुधारसाम् ।
कम्रवक्रपवनाग्रहप्रचलदुन्मिषद्भ्रमरमण्डलां

तुर्महे मनसि शर्मदामनिशमम्बिकां त्रिपुरसुन्दरीम् ॥ ७॥

कम्रकान्तिजिततारपूरमणिसूत्रमण्डलसमुल्लसत्
कण्ठकाण्डकमनीयतापहृतकम्बुराजरुचिडम्बराम् ।
किञ्चिदानतमनोहरां सयुगचुम्बिचारुमणिकर्णिकां
पञ्चबाणपरिपन्थिपुण्यलहरीं भजे त्रिपुरसुन्दरीम् ॥ ८॥

हस्तपद्मलसदिक्षुचापसृणिपाशपुष्पविशिखोज्ज्वलां
तप्तहेमरचिताभिरामकटकाङ्गुलीयवलयादिकाम् ।
वृत्तनिस्तुलनिरन्तरालकठिनोन्नतस्तनतृणीभव-
न्मत्तहस्तिवरमस्तकां मनसि चिन्तये त्रिपुरसुन्दरीम् ॥ ९॥

लक्षगाढपरिरम्भतुष्टहरहासगौरतरलोल्लसत्
चारुहारनिकराभिरामकुचभारतान्ततनुमध्यमाम् ।
रोमराजिललितोदरीमधिकनिम्ननाभिमवलोकये
कामराजपरदेवतामनिशमाश्रये त्रिपुरसुन्दरीम् ॥ १०॥

हीरमण्डलनिरन्तरोल्लसितजातरूपमयमेखला
चारुकान्तिपरिरम्भसुन्दरसुसूक्ष्मचीनवसनाञ्चिताम् ।
मारवीररसचातुरीधृतधुरीणतुङ्गजघनस्थलां
धारये मनसि सन्ततं त्रिदशवन्दितां त्रिपुरसुन्दरीम् ॥ ११॥

सप्तसप्तकिरणानभिज्ञपरिवर्धमानकदलीतनु-
स्पर्धिमुग्धमधुरोरुदण्डयुगमन्दितेन्दुधरलोचनाम् ।
वृत्तजानुयुगवल्गुभावजितचित्तसम्भवसमुद्गकां
नित्यमेव परिशीलये मनसि मुक्तिदां त्रिपुरसुन्दरीम् ॥ १२॥

कण्ठकाण्डरुचिकुण्डताकरणलीलया सकलकेकिनां
जङ्घया तुलितकेतकीमुकुलसङ्घया भृतमुदञ्चिताम् ।
अम्बुजोदरविडम्बिचारुपदपल्लवां हृदयदर्पणे
बिम्बितामिव विलोकये सततमम्बिकां त्रिपुरसुन्दरीम् ॥ १३॥

लभ्यमानकमलार्चनप्रणतितत्परैरनिशमास्थया
कल्पकोटिशतसञ्चितेन सुकृतेन कैश्चन नरोत्तमैः ।
कल्पशाखिगणकल्प्यमानकनकाभिषेकसुभगाकृतिं
कल्पयामि हृदि चित्पयोजनवषट्पदीं त्रिपुरसुन्दरीम् ॥ १४॥

ह्रीमिति प्रथितमन्त्रमूर्तिरचलात्मजेत्युदधिकन्यके-
त्यम्बुजासनकुटुम्बिनीति विविधोपगीतमहिमोदयाम् ।
सेवकाभिमतकामधेनुमखिलागमावगमवैभवां
भावयामि हृदि भाविताखिलचराचरां त्रिपुरसुन्दरीम् ॥ १५॥

स्तोत्रराजममुमात्तमोदमहरागमे प्रयतमानसो
कीर्तयन्निह नरोत्तमो विजितवित्तपो विपुलसम्पदाम् ।
प्रार्थ्यमानपरिरम्भकेलिरबलाजनैरपगतैषणो
गात्रमात्रपतनावधावमृतमक्षरं पदमवाप्नुयात् ॥

इति त्रिपुरातिलकस्तोत्रं समाप्तम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. Tripuratilakam ..
was typeset on August 6, 2016

Please send corrections to sanskrit@cheerful.com